# 2023

## SANSKRIT — HONOURS

**Paper : CC-3**

**[Classical Sanskrit Literature (Prose)]**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**Unit - I**

**(Marks : 10)**

1. "शुकनासोपदेशः" इति पाठ्यांशमनुसृत्य लक्ष्म्याश्चारित्रिकं वैशिष्ट्यं सारतः विव्रियताम्। 10

*अथवा,*

(a) कस्यचन**नैकस्य** मातृभाषयामनुवादः क्रियताम्। 5

(i) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः।

(ii) अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदय-मधिकतरमुपजनयति।

(b) कस्यचन**नैकस्य** भावः सम्प्रसार्यताम्। 5

(i) कुसुमशरप्रहारजर्जरिते हृदये जलमिव गलत्युपदिष्टम्।

(ii) अपरिणामोपशमो दारुणः लक्ष्मीमदः।

**Unit - II**

**(Marks : 10)**

2. कथाकाव्यस्य अलंकारशास्त्रसम्मतानि वैशिष्ट्यानि लिखित्वा कादम्बर्यां तानि सर्वथानुसृतानि न वेति विचार्यताम्। 5+5

*अथवा,*

"वाणी बाणो बभूव"– बाणभट्टस्य रचनायाः। गुणविचारमुखेन इत्युक्तेः याथार्थ्यं विचार्यताम्। 10

## Section - B

### Unit - I

**(Marks : 15)**

3. (a) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरीलिप्या च** लेखनीयम्। 2×5

(i) "राजवाहनचरितम्" इति पाठ्यांशः कस्मिन् मूलग्रन्थे अन्तर्भवति? तस्य ग्रन्थस्य रचयिता कः?

(ii) का आसीत् बालचन्द्रिका? तस्याः पत्युः नाम किम्?

(iii) "अद्यैव क्षपावसाने विवाहनीया राजदुहिता"– अत्रोल्लिखिता राजदुहिता का? कैश्च तस्याः विवाहक्षणः निर्धारितः?

(iv) "ददृशुश्च तदवस्थं राजकुमारम्"– अत्रोल्लिखितः राजकुमारः कः? तस्य कीदृशी अवस्था सूचिता?

(v) मालवराजस्य पुत्रस्य नाम किम्? स कुत्र तपस्यायां निरतः आसीत्?

(vi) "सहस्व वासु मासद्वयम्"– केनोक्तमिदमाश्वासवाक्यम्? वासु-शब्दस्य कोऽर्थः?

(vii) "दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः"– अत्र 'त्वत्' इत्यनेन कः बोधितः? तस्य प्रसादात् कस्य कस्याः वा श्रोत्रवृत्तिः चरितार्था अभवत्?

(viii) क आसीत् वीरशेखरः?

(b) अधोरेखाङ्कितयोः पदयोः कस्यचि***देकस्य* संस्कृतभाषया देवनागरीलिप्या च** विग्रहवाक्यं प्रदाय समासनाम लेखनीयम्। 2×1

(i) सुप्तयोस्तु तयोः स्वप्ने विसगुणनिगडितचरणः जरठः कश्चिज्जालपादोऽदृश्यत।

(ii) श्रुत्वा तु भुवनवृत्तान्तमुत्तमाङ्गना।

(c) अधोरेखाङ्कितयोः यथाभिमत***मेकस्य* संस्कृतभाषया देवनागरीलिप्या च** व्याकरणसम्मता टिप्पणी लेखनीया। 2×1

(i) पक्वमिदानीं त्वत्पादपद्मपरिचर्याफलम्।

(ii) राजपुत्रं सरभसमाचकर्ष।

(d) अधोरेखाङ्कितयोः यथाभिमत***मेकस्य*** व्युत्पत्तिः प्रदर्शनीया। 1×1

(i) रुरोध च बलभरदत्तकम्पः चम्पाम्।

(ii) प्रत्यबुध्येतां चोभौ।

### Unit - II

**(Marks : 15)**

4. कस्याभिशापेन सुरतमञ्जर्याः रजतशृङ्खलायां परिणमनमभवत्? अभिशापकारणं लिखित्वा कथं सा पूर्वरूपं लब्धवतीति यथापाठ्यं वर्ण्यताम्। 1+2+7

**अथवा,**

(a) कस्यचि**देकस्य** भावः सम्प्रसार्यताम्। 6×1

(i) कः स महापुरुषो येनैतन्मानुषमात्रदुष्करं महत् कर्मानुष्ठितम्।

(ii) वार्तयानया मत्प्राणसमां समाश्वासय।

(b) कस्यचि**देकस्य** विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 2×1

(i) महापुरुषः 4(a)(i) प्रश्ने।

(ii) मत्प्राणसमां 4(a)(ii) प्रश्ने।

(c) कस्यचि**देकस्य** कारकविभक्तिः निर्णेया। 1×1

(i) येन 4(a)(i) प्रश्ने।

(ii) वार्तया 4(a)(ii) प्रश्ने।

(d) कस्यचिदे***कस्य*** व्युत्पत्तिः कार्या। 1×1

(i) अनुष्ठितम् 4(a)(i) प्रश्ने।

(ii) समाश्वासय 4(a)(ii) प्रश्ने।

**5.** कस्यचि**देकस्य** मातृभाषया अनुवादः कार्यः। 5×1

(a) स्थविरः स राजा जराविलुप्तमानावमानचित्तो दुश्चरितदुहितृपक्षपाती यदेव किञ्चित् प्रलपति, त्वयापि किं तदनुमत्या स्थातव्यम्। अविलम्बितमेव तस्य कामोन्मत्तस्य चित्रवधवार्ताप्रेषणेन श्रवणोत्सवोऽस्माकं विधेयः।

(b) कृतविवाहकृत्यश्चोत्थायाहमेव तमनार्यशीलं तस्य हस्तिनः कृत्वा क्रीडनकं तदधिरूढ एव गत्वा शत्रुसाहाय्याय प्रत्यासीदतो राजकन्यकस्य सकोशवाहनस्यावग्रहणं करिष्यामि।

**Section - C**

**Unit - II**

**(Marks : 15)**

**6.** (a) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरीलिप्या च** देयम्। 2×5

(i) पञ्चतन्त्रस्य रचयितुः नाम किम्? किमर्थं तेन ग्रन्थोऽयं रचितः?

(ii) पञ्चतन्त्रे कति तन्त्राणि सन्ति? तेषां नामानि लिख्यन्ताम्।

(iii) शुकसप्तति-ग्रन्थस्य रचयितुर्नाम किम्? ग्रन्थे अस्मिन् कति आख्यानानि सन्ति?

(iv) शुकसप्तति-ग्रन्थे आख्यानानां वक्ता कः? स कां तानि अश्रावयत्?

(v) वेतालपञ्चविंशतिका-ग्रन्थे क आसीत् वेतालः? ग्रन्थस्यास्य रचयितुः नाम किम्?

(vi) वेतालपञ्चविंशतिका-ग्रन्थे केन कस्मै राज्ञे फलानि दत्तानि?

(vii) पुरुषपरीक्षा-ग्रन्थे कति कथाः सन्ति? ग्रन्थस्यास्य रचयितुः नाम लिख्यताम्।

(b) कस्यचिदेकस्य संस्कृतभाषया देवनागरीलिप्या च टीका लेखनीया। 5×1

(i) बृहत्कथा।

(ii) सिंहासनद्वात्रिंशिका।

---